Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(1), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

# धर्मव्याधोपाख्याने हिंसाहिंसायोः धर्माधर्मविवेकः

**B.V.G.S.S. SWAMY**
Research Scholar
Dept. of Sanskrit
Andhra University
Visakhapatnam.

## प्रस्तावना

**धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ॥**

महाभारतम् - आदिपरिवम् -62/53श्लोकः, पृ- 782

इति प्रतिज्ञां कुर्वता भगवता वेदव्यासेन “अहिंसा परमोधर्मः” इति महाभारते बहुषु सन्दर्भेषु निरूपितः। विशेषतःअरण्यपर्वणि अहिंसायाः अपि क्वचित् धर्मातिक्रमणं हिंसायाः धार्मिकत्वमपि स्पष्टमुपपादितम्। हिंसा कुत्र धर्म्या ? अहिंसा कुतः अधर्म्या ? इति धर्मसूक्ष्म विचारः तदुक्तप्रकारेण अस्मिन् निबन्धे निरुप्यते ।

**धर्मव्याधोपख्यानम् -** महाभारते अरण्यपर्वे मार्कण्डेयसमस्या अपर नामके उपपर्वणि सप्तनवत्युत्तरशततमाध्यायादारभ्य (197) षडधिकशततमाध्याय पर्यन्तं (206) नवसु अध्यायेषुचतुशतैः श्लोकैः (400) धर्माव्याधोपाख्यानं निरूपितम् । कौशिकनामकः वेदाध्यायी ब्राह्मणः वृद्धौ मातापितरौ त्यक्त्वा अध्ययनार्थं ग्रामान्तरे वसतिस्म । एकदा तस्योपरि कश्चन बकः विष्टां विससर्ज। ब्राह्मणेन कुपितेन दृष्टः स बकः भस्मीभूतः च । ततः भिक्षार्थं ग्रामं गतः एकस्मिन् गृहे भिक्षां ययाचे । सापि कुटुम्बिनी भिक्षानयनार्थं गृहंप्रविश्यापि भर्तुः सपर्याकरणेन चिरायिता ।

ततः कुपितः कौशिकः तां निनिन्द । सापि अहं पतिदेवता मां दुग्धुं न प्रभवसि यतो नाहं बकः इत्युवाच। ततः तया उपदिष्टः स ब्राह्मणः मिथिलां गत्वा कस्मादपि व्याधस्य सकाशात् धर्मविशेषान् अधिगतवान् । अस्मिन् निबन्धे तेन व्याधेन उक्तं हिंसाहिंसयोः धर्मस्वरूपं निरूप्यते ।

**हिंसापि धर्म्या -** कुलक्रमागतया हिंसाश्रितया वृत्या यदि जीवनं भवति तदा सा हिंसा धर्म्या भवत्येव । कौशिकः मांसविक्रयणं व्याधं दृष्ट्वा "अहिंसा परमो धर्मः किमिति मांसविक्रयेण अधर्मेण धर्मव्यतिक्रम करोषि । एवं ब्राह्मणेन पृष्टः व्याधः स्ववृत्तेः धार्मिकत्वं एवं निरूपितवान् । इदं च मांसविक्रयणरूपकर्म पित्रुर्पैतामहक्रमेणागतं स्वधर्मे वर्तमानोऽहं न निन्द्यः । अहं स्वयं जन्तून् न हन्मि, किन्तु परैः हतानां जन्तूनामेव मांसस्य विक्रयं करोमि । स्वयमहं मांसं न भक्षयामि ततोऽहं धार्मिकः एव ।


Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(1), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**कुलोचितमिदं कर्म पितृर्पैतामहं मम ।**
**वर्तमानस्य मे धर्मे स्वे मन्युं मा कृथा द्विज ॥**
**परेण हि हतान्ब्रह्मन्वराह महिषानहम् ।**
**न स्वयं हन्मि विप्रर्षे विक्रीणामि सदा त्वहम् ॥**
**न भक्ष्यामि मांसानि ऋतुगामी तथा ह्यहम् ।**
**सदोपवासी च तथा नक्तभोजी तथा द्विज ॥**

महाभारतम् - अरण्यपर्व - 198-19, 31, 32 लोका: पृ-1059

मांसभक्षणम् अधर्मोऽपि क्वचित् धर्मः भवत्येव अग्नयः मांसप्रियाः इति प्रसिद्धा श्रुतिः ततः यागशेषस्य मांसस्य भोजनं धर्मः एव भवति । एकोन द्विशततमे अध्याये (199) विंशत्यधिकैः श्लोकैःएष विषयः विस्तरेण वर्णितः । रन्तिदेवः समांसं अन्नं दत्वा चातुर्मास्ये ब्राह्मणान् भोजयित्वा धार्मिकः एवासीत् ।

**राज्ञो महानसे पूर्वं रन्तिदेवस्य वै द्विज ।**
**द्वे सहसे तु वध्येते पशूनामन्वहं तदा ॥**
**समांस ददतो ह्यन्नं रन्तिदेवस्य नित्यशः ।**
**अतुला कीर्तिरभवन्नृपस्य द्विजसत्तम ।**
**चातुर्मस्येषु पशवो वध्यन्त इति नित्यशः ॥**

महाभारतम अरण्यपर्व - 199-78 श्लोक:-78, पृ-1069

ओषध्यादयः अपि जीवमयाः एव तेषां भक्षणेन अपि हिंसा भवत्येव । कृष्यां बहवः कीटादयः हिंसिताः भवन्त्येव । धान्यबीजादीनि जीवयुक्तानि इति हेतोः तेषां भक्षणमपि हिंसैव ततः हिंसया विना जीवयात्रा दुर्लभा । अपिच अल्पसत्वाः महासत्वानां आहारार्थं ब्रह्मणैव कल्पिताः । ततः सत्वैरेव सत्वानि जीवन्ति । एवं हिंसापि नाना स्थलेषु अपरिहार्या धर्म्या च भवति इति तत्रैव प्रतिपादितम् ।

**कृषिं साध्विति मन्यन्ते तत्र हिंसा परा स्मृता ।**
**कर्षन्तो लाङ्गलैः पुंसो घ्नन्ति भूमिशयान्बहून् ॥**
**जीवानन्यांश्च बहुशस्तत्र किं प्रतिभाति ते ।**
**धान्यबीजानि यान्याहुर्व्रीह्यादीनि द्विजोत्तम ।**
**सर्वाण्येतानि जीवानि तत्र किं प्रतिभाति ते ॥**

महाभारतम- अरण्यपर्व - 199 - 19,20 श्लोक:, पृ-1071

**अहिंसया दोषः -** सत्वैः सत्वानि जीवन्ति इति प्राक् निरूपितं तत्र अहिंसा अवलम्बनेन प्राणिनां आहाराभावात् नाशः भवति इति हिंसा त्यागोपि दोषः एव । अतः अहिंसा शब्दे नञ् अल्पार्थकः सर्वस्य जगतः जीवमयत्वात् हिंसा परित्याग: आत्मनाशायभवति इति अहिंसया अधर्मः भवेत् ततः यथावसरं अल्पतरां स्वरक्षणयोग्यां स्वपोषणयोग्यां च हिंसां अकृत्वा जीवयात्रा दुर्घटा भवेत् । यथाशक्ति हिंसां वर्जयित्वा अवसरे च हिंसापरो भूत्वापि अहिंसको भवत्येव इति महाभारते स्पष्टमुक्तम् । यथा -

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(1), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**अहिंसेति यदुक्तं हि पुरुषोर्विस्मितैः पुरा ।**
**के न हिंसन्ति जीवान्वै लोकेऽस्मिन्द्विजसत्तम ।**
**बहु संचिन्त्य इह वै नास्ति कश्चिदहिंसकः ॥**
**अहिंसायां तु निरता यतयो द्विजसत्रम ।**
**कुर्वन्त्येव हि हिंसां ते यत्नादल्पतरा भवेत् ॥**

महाभारतम् - अरण्यपर्वम् - 199 - 28,29 श्लोकाः, पृ-1073

## धर्मव्याधोपाख्यानस्थ समाजोपयोगित्वम्

हिंसामपरित्यज्यापि अनृशंसो भूत्वा धार्मिकः एव भवेदिति विशेषतः महाभारते अस्मिन्नेव सन्दर्भ बहुधा निरूपितम् । अहिंसाया: अपि आनृशंस्यं परमो धर्मः । नृशंसोऽपि हिंसक : किन्तु तयोः भूमान् भेदोऽस्ति । नृशंसो घातुकः क्रूर:इत्यमरः (3-1-47) हननशीलः धातुकः, स च निमित्तं विनाचि प्राणिहिंसां कृत्वा नन्दति । तेन कृता हिंसा तस्य प्रयोजिका जीवनकारणं वा न भवति । हिंसकस्तु स्वरक्षणार्थं उदरपोषणार्थंवा हिंसां करोति । तावतीं हिंसां कृत्वापि सः अहिंसा परः एव भवति । सततं परद्रोह चिन्तकः नृशंसो भवति तथाविधः स्वभावः सर्वथा न करणीयः । कदाचित् अहमेव सर्वश्रेष्ठः इति आत्ममानितापि परेषां हिंसार्थ प्राणिनं प्रेरयति ।

तदा तितिक्षा कृता चेतु प्रज्ञया हिंसायाः दूरीभूत्वाश्रेयः प्राप्नोति इत्यपि धर्मव्याधोपाख्याने स्पष्ठम् । अहिंसायाः जीवातु भूताः गुणा विस्तरेण अपि तत्रो पाख्याने विस्तरेण वर्णिताः ।

**अहिंसा सत्यवचनमानृशंस्यमथार्जवम् ।**
**अद्रोहो नातिमानश्च ह्रीस्तितिक्षा दमः शमः ॥**
**धीमन्तो धृतिमन्तश्च भूतानामनुकम्पकाः।**
**अकाम द्वेषसंयुक्तास्ते सन्तो लोकसत्कृताः ॥**
**त्रीण्येव तु पदान्याः सतां वृत्तमनुत्तमम् ।**
**न द्रुह्येच्चैव दद्याच्च सत्यं चैव सदा वदेत् ॥**
**सर्वत्र च दयावन्तः सन्तः करुणवेदिनः ।**
**गच्छन्तीह सुसंतुष्टा धर्म्यं पन्थानमुत्तमम् ॥**

महाभारतम्- अरण्यपर्वम् - 198/876 श्लोकाः,पृ-1100, 1067

**उपसंहारः** - कलियुगः एव तमः प्रधानः हिंसा पोषकः इति पुराणेतिहासेषु विस्तरेण उपवर्णितम् । अद्यतन कालो परेषां वृद्धिं दृष्ट्वापि तेभ्यः असूयिताः तान् नाशयितुं बहवो हिंसापराः दृश्यन्त एव । इदानीं सम्भूताः संग्रामाः अपि तथा विधाः दृष्टाः । हिंसायाः परित्यागे सत्यं, दया इत्यादयो गुणाः सहकृत्वानः भवन्त्येव तथाविधान् गुणान् सत्साङ्गत्येन सद्ग्रन्थपठनेन परिपुष्टान् कुर्युः इति पुराणेतिहास तात्पर्यम् ।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(1), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

## उपयुक्तग्रन्थसूची

महाभारतम् - स्वाध्याय मण्डल पार्थि जिला बलसाड, गुजरात् – 1972.